प्रख्यानम् । अनभवत्तं, क्ली । इति मेदिनी ।
नौ, १२० ॥ (न अलीकमिति । सत्यम् । यथा,
वक्रोक्तिपञ्चाशिकायाम् । ४२ ।
"नालीकाश्रयमेतदस्य वचनं वाणाश्रयं किं
वच: ॥")

नालीकिनी, स्त्री, (नालीकमस्त्यस्या इति ।
नालीक+इनि: । ङीप् ।) पद्मसमूह: । इति
शब्दरत्नावली ॥

नालीव्रण:, पुं, (नालीगतो व्रण: ।) नाड़ीव्रण: ।
इति शब्दरत्नावली ॥

नाविक:, पुं, (नावा तरतीति । नौ+"नौद्व्याच-
ष्ठन् ।" ४ । ४ । ७ । इति ठन् । नौरस्त्यस्येति ।
"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन्
वा ।) कर्णधार: । इत्यमर: । १ । १० । १२ ॥
(यथा, महाभारते । ८ । ७१ । ७५ ।
"भिन्ननौका यथा राजन् ! द्वीपमासाद्य निर्वृता: ।
भवन्ति पुरुषव्याघ्र ! नाविका: कालपर्य्यये ॥")

नाव्यं, त्रि, (नावा तार्य्यम् । नौ+"नौवयो-
धर्म्मेति ।" ४ । ४ । ९१ । इति यत् ।) नौका-
गम्यदेशादि । इत्यमर: । १ । १० । १० ॥ (यथा,
रघु: । ४ । ३१ ।
"मरुपृष्ठान्युदम्भांसि नाव्या: सुप्रतरा नदी: ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार स: ॥"
नवस्य भाव: । नव+ष्यञ् ।) नवत्वम् ॥

नाश:, पुं, (नश+भावे घञ् ।) पलायनम् ।
निधनम् । (यथा, महाभारते । १ । १२० । १६ ।
"पित्र्यादृणादनिर्मुक्तस्तेन तप्ये तपोधना: ।
देहनाशे ध्रुवो नाश: पितृणामेष निश्चय: ॥")
अनुपलम्भ: । अदर्शनम् । इति मेदिनी । शे,
६ ॥ परिध्वस्ति: । इति हेमचन्द्र: । २ । २३८ ॥
जीवानां नाशहेतुर्यथा,—
"सङ्गात् संजायते काम: कामात् क्रोधोऽभि-
जायते ।
क्रोधाद्भवति सम्मोह: सम्मोहात् स्मृतिविभ्रम: ॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥"
इति श्रीभगवद्गीता ॥
कुलनाशकारणं यथा,—
"अनृतात् पारदार्य्याच्च तथाभक्ष्यस्य भक्षणात् ।
अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम् ॥
अश्रोत्रिये वेददानात् वृषलेषु तथैव च ।
विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम् ॥"
इति कौर्म्मे उपविभागे १५ अध्याय: ॥
नश्यतां पूर्व्वरूपाणि यथा,—
अत्रिरुवाच ।
"नश्यतां पूर्व्वरूपाणि जनानां कथयस्व मे ।
नगराणां तथा राज्ञां त्वं हि सर्व्वं वदिष्यसि ॥
गर्ग उवाच ।
पुरपापाचारनियमात् परित्यजति देवता ।
ततोऽपरागाद्देवानामुपसर्गा: प्रवर्त्तते ॥
दिव्यान्तरीक्षं भौमञ्च त्रिविधं परिकीर्त्तितम् ।
यदृक्षवैकृतं दिव्यमन्तरीक्षं निबोध मे ॥
उल्कापातो दिशां दाह: परिवेशस्तथैव च ।
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता च या ।
एवमादीनि लोकेऽस्मिन् नाकेश्यानां विनिर्द्दिशेत् ॥
चर: स्थिरस्तु भूमौ च भूकम्पश्चापि भूमिज: ।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम् ॥"
इति मात्स्ये २०३ अध्याय: ॥

नाशी, [न्] त्रि, (नाशोऽस्त्यस्येति । नाश+
इनि: ।) नाशविशिष्ट: । नाशशब्दादस्त्यर्थे
इन्प्रत्ययनिष्पन्न: ॥

नासत्यौ, पुं, (नास्ति असत्यं ययोस्तौ । "नभ्राण्-
नपादिति ।" ६ । ३ । ७५ । इति नञ: प्रकृति-
भाव: ।) अश्विनीकुमारौ । नित्यद्विवचनान्तो-
ऽयम् । इत्यमर: । १ । १ । ५४ ॥ एतौ शूद्रौ । यथा,
"आदित्या: क्षत्रियास्तेषां विशश्च मरुतस्तथा ।
अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ ॥
स्मृतास्त्वङ्गिरसो देवा ब्राह्मणा इति निश्चय: ॥"
इति महाभारते मोक्षधर्म्मे ॥
("सन्दृश्य दस्रयोरिन्द्र: कर्म्माण्येतानि यत्नवान् ।
आयुर्व्वेदं निरुद्वेगौ तौ ययाचे शचीपति: ॥
नासत्यौ सत्यसम्पन्न शक्रेण किल याचितौ ।
आयुर्व्वेदं यथाधीतं ददतु: शतमन्यवे ॥
नासत्याभ्यामधीत्यैव आयुर्व्वेदं शतक्रतु: ।
अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नासा, स्त्री, (नासते शब्दायते इति । नास शब्दे
+"गुरोश्च हल: ।" ३ । ३ । १०३ । इति अ: ।
ततष्टाप् । नास्यतेऽनयेति । नास+करणे
घञ् वा ।) नासिका । नाक् इति भाषा । सा
च गर्भस्थबालकस्य पञ्चभिर्मासैर्भवति । इति
सुखबोध: ॥ तस्या: शुभाशुभलक्षणं यथा,—
"शुकनास: सुखी स्याच्च शुष्कनासोऽतिजीवनम् ।
छिन्नाग्रह्रस्वनास: स्यादगम्यागमने रत: ॥
दीर्घनासे च सौभाग्यं चौर आकुञ्चितेन्द्रिय: ।
स्त्रीमृत्युश्चिपिटनास ऋजुर्भाग्यवतां भवेत् ॥
अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे ।
क्रूरे दक्षिणवक्रा स्याद्धनिनाश्च स्मृतं सकृत् ॥"
इति गरुड़पुराणम् ॥
द्वारोपरिस्थितदारु । भान् काठ इति कपालि
इति च भाषा । इत्यमर: । २ । २ । १३ ॥ वासक-
वृक्ष: । इति राजनिर्घण्ट: ॥

नासाच्छिन्नी, स्त्री, (छिद्+भावे क्त: । नासायां
छिन्नं छेदो यस्या: । ङीष् ।) पूर्व्विकापक्षी ।
इति त्रिकाण्डशेष: ॥

नासादारु, क्ली. 'नासायै यद्दारु । नासेव दारु
इति वा ।) द्वारोर्द्धस्थितकाष्ठम् । इत्यमर-
टीकायां स्वामी ॥ कपालि इति भाषा ॥

नासारोग:, पुं, (नासाया रोग: ।) नासिका-
व्याधि: । "अथ नासारोगाधिकार: । तत्र नासा-
रोगाणां नामानि संख्याञ्चाह ।
आदौ च पीनस: प्रोक्त: पूतिनस्यस्तत: परम् ।
नासापाकोऽत्र गदित: पूयशोणितमेव च
क्षवथुर्भ्रंशथुर्दीप्ति: प्रतीनाह: परिस्रव: ।
नासाशोष: प्रतिश्याया: पञ्च स्युरर्बुदानि च ॥
चत्वार्य्यर्शांसि चत्वार: शोथाश्चत्वारितानि च ।
रक्तपित्तानि नासायां चतुस्त्रिंशद्गदा: स्मृता: ॥
तेषु पीनसस्य लक्षणमाह ।
आनह्यते शुष्यति यस्य नासा
प्रक्लेदमायाति च धूप्यते च ।
न वेत्ति यो गन्धरसांश्च जन्तु-
र्जुष्टं व्यवस्येदिह पीनसेन ॥
आनह्यते श्वासश्लेष्मितकफेनावध्यते अवरुद्ध
इति यावत् । प्रक्लेदं आर्द्रताम् । धूप्यते सन्ता-
प्यते । गन्धरसान् गन्धान् सुरभीनसुरभींश्च न
वेत्ति । नासाया आनहनं तत्र हेतु: । तथा
रसान् मधुरादींश्च न वेत्ति । नासारोगा-
रम्भकदोषैश्च रसनाया अपि दुष्टे: । व्यवस्येत्
जानीयात् । अपीनसपीनसौ द्वावपि शब्दौ
स्त: ॥ * ॥ अनुक्तसंग्रहार्थमाह ।
तथानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम् ।
तं विकारं पीनसं प्रतिश्यायसमानलिङ्गं वात-
श्लेष्मकप्रतिश्यायतुल्यलक्षणम् ॥
पूतिनस्यमाह ।
दोषैर्व्विदग्धैर्गलतालुमूले
संवासितो यस्य समीरणस्तु ।
निरेति पूतिर्म्मुखनासिकाभ्यां
तं पूतिनस्यं प्रवदन्ति रोगम् ॥
दोषै: पित्तकफरक्तै: । अत्र रक्तस्यापि दोषत्व
दोषवाहकत्वात् । विदग्धै: दुष्टै: । संवासित:
पूतिभावं नीत: । पूतिनस्यं नासायां भवो नस्यो
वायु: पूतिर्नस्यो यत्र स पूतिनस्यस्तम् ॥ * ॥
नासापाकमाह ।
घ्राणाश्रितं पित्तमरूंषि कुर्य्यात्
यस्मिन् विकारे बलवांश्च पाक: ।
तं नासिकापाकमिति व्यवस्येत्
विक्लेदकोथावथवापि यत्र ॥
विक्लेद आर्द्रता । कोथ: पूतिभाव: ॥ * ॥
पूयरक्तमाह ।
दोषैर्व्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तै: ।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥
क्षवथुमाह ।
घ्राणाश्रिते मर्म्मणि संप्रदुष्टो
यस्यानिलो नासिकया निरेति ।
कफानुयातो बहुशोऽतिशब्द-
स्तं रोगमाहु: क्षवथुं गदज्ञा: ॥
घ्राणाश्रिते मर्म्मणि शृङ्गाटके ॥ * ॥
दोषजं क्षवथुमभिधायागन्तुजं क्षवथुमाह ।
तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान् कटूनर्कनिरीक्षणाद्वा ।
सूत्रादिभिर्व्वा तरुणास्थिमर्म्म-
ण्युद्घट्टितेऽन्य: क्षवथुर्न्निरेति ॥
तीक्ष्णोपयोगात् राजिकादिभक्षणात् । अर्क-
निरीक्षणात् सूर्य्यदर्शनात् तेन कफविलेपनात् ।